**ब्राह्मणग्रामन्यायः** The maxim of a village in which Brāhmaṇas abound. This shows the village has more numerous Brāhmaṇas than in some other village (प्रचुरब्राह्मणो ग्रामः) or in the village the Brāhmaṇas outnumber the other castes (प्रचुरब्राह्मणो ग्रामः). This is according to the maxim प्राधान्येन व्यपदेशा भवन्ति. cf. मल्लग्रामन्याय.

**ब्राह्मणपरिव्राजकन्यायः** The maxim of the Brāhmaṇas and the mendicants. In such a sentence as ब्राह्मणा भोजयितव्याः परिव्राजकाश्च, the separate mention of the mendicants, who are included in the term Brāhmaṇa, merely emphasizes their position as a special part of the general body. The maxim has the same import as गोबलीवर्दन्याय, तक्रकौण्डिन्यन्याय and ब्राह्मणवसिष्ठन्याय. cf. वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनार्थं पृथग्ग्रहणं यथा ब्राह्मणा आगता वसिष्ठोऽप्यागत इति । पदमञ्जरी.

**ब्राह्मणश्रमणन्यायः** The maxim of the Brāhmaṇa-ascetic. The श्रमण is a Buddhist ascetic and hence not a Brāhmaṇa, but the expression ब्राह्मणश्रमण implies that though now a Buddhist formely he was a Brāhmaṇa. cf. अत्रामित इत्यादावपिशब्दाभावाद् विरोधाभासो व्यङ्ग्यः । व्यङ्ग्यस्यालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलंकारत्वमुपचर्यते । S. D.

**भक्षितेऽपि लशुने न शान्तो व्याधिः** Although the garlic has been eaten the disease is not cured. cf. ननु भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायेन प्रपञ्चस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात् कथमद्वैतसिद्धिरित्याशङ्कां तूष्णीकुर्वन्नाह अखण्डमिति । com. on वेदान्तसार. This is used to illustrate the non-attainment of the coveted result in spite of the performance of a prohibited act.

**भद्रमभद्रं वा कृतमात्मनि प्रकल्पते** An act good or bad conduces [to happiness or otherwise] of the performer himself. cf. Marāṭhī proverb "करावें तसें भरावें."

**भस्मनि आज्याहुतिः** Offering clarified butter on ashes instead of on the sacrificial fire. This is used to illustrate wasted or misdirected effort. cf. स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात् तादृक् स्यात् । Ch. Up. 5. 24; अकार्यवारणोद्युक्तो मूढे यः परिखिद्यते । वाग्विस्तरो वृथा तस्य भस्मन्याज्याहुतिर्यथा ॥; नोपदेशशतेनापि मूढोऽकार्यान्निवर्त्यते । शीतांशुग्रसनात् केन राहुर्वाक्यैर्निवारितः ॥ उपमितिभवप्रपञ्चा कथा.

**भस्मीभूतस्य देहस्य पुनरागमनं कुतः** This is the theory of the लोकायतिक**s** or Materialists. They do not believe in pre-birth and rebirth. So they do not take into consideration धर्म and मोक्ष पुरुषार्थ**s**. cf. यावज्जीवं सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत् । भस्मी... कुतः ॥; असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत् कामहैतुकम् ॥ Bg. 16. 8.

**भारैकदेशावतरणन्यायः** The illustration of the lowering of one part of a load [and thus easing one's burden]. दृढविपर्ययज्ञानानन्तरं सहसैव च सम्यग्ज्ञानोत्पादातिभाराद् भारैकदेशावतरणार्थं संशयोत्थापनामात्रमेव तावद्युक्तम् । तंत्र. 1. 3. 22.

**भिक्षुपादप्रसारणन्यायः** The maxim of a beggar's obtaining a firm footing [in a patron's house]. cf. the English equivalent. "Give him an inch and he will take an ell." यथा कश्चिद् भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद् धनिनो गृहे प्रविश्य युगपत् सर्वाभीष्टलाभं मन्यमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयमुत्पाद्य सर्वमभीष्टं संपादयामीति धिया स्वल्पामपि भिक्षां बहुमन्यमानः पश्चात् क्रमेण स्वाभीष्टं संपादयत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः । रघुनाथ. cf. Mar. "भटाला दिली ओसरी भट हातपाय पसरी"; "चञ्चुप्रवेशे मुसलप्रवेशः ।"

**भिल्लीचन्दनन्यायः** The maxim of a Bhil woman and sandal tree. cf. the English equivalent "Familiarity breeds contempt." अतिपरिचयादवज्ञा संततगमनादनादरो भवति । मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥ Subhāṣ.; cf. Mar. "अतिपरिचय खोटा मान राहात नाहीं ।"

**भूतं भव्याय कल्पते** A thing accomplished in the past conduces to the attainment of the result in future. The मीमांसक**s** avow that an accomplished sacrificial act is not an end in itself but for the bringing about of a result in the future such as the attainment of heaven etc. This, consequently, necessitates belief in the theory of अपूर्व as a connecting link between the two.

**भूमिरथिकन्यायः** The simile of the man who in order to become proficient makes drawings of a war-chariot on the ground. यत्तावदुपाध्यायः शिष्यसंनिधावधीते तद्ग्रहणार्थम् । यच्छिष्यस्तद्धारणार्थम् । ग्रहणधारणे प्रयोगार्थे भूमिरथिकवत् शुष्केष्टिवद्वा । तद्यथा भूमिरथिको भूमौ रथमालिख्य शिक्षां करोति संग्रामे प्राशुभावो भवितेति यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते प्रयोगे प्राशुकर्मा भवितास्मीति । एवमेतद् द्रष्टव्यम् । ŚB. on MS. 7. 2. 15.

**भूलिङ्गशकुनिन्यायः** The simile of the bird भूलिङ्ग. The purport of the maxim seems to be, "Practise what you preach". cf. अथ चैषां न ते बुद्धिः प्रकृतिं याति भारत । मयैव कथितं पूर्वं भूलिङ्गशकुनिर्यथा ॥ भूलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे । भीष्म तस्याः सदा वाचः श्रूयन्तेऽर्थविगर्हिताः ॥ मा साहसमितीदं सा सततं वाशते किल । साहसं चात्मनातीव चरन्ती नावबुध्यते ॥ सा हि मांसार्गलं भीष्म मुखात् सिंहस्य खादतः । दन्तान्तरविलग्नं यत् तदादत्तेऽल्पचेतना ॥ इच्छतः सा हि सिंहस्य भीष्म जीवत्यसंशयम् । तद्वत् त्वमप्यधर्मिष्ठ सदा वाचः प्रभाषसे ॥ इच्छतां भूमिपालानां भीष्म जीवस्यसंशयम् । लोकविद्विष्टकर्मा हि नान्योऽस्ति भवता समः ॥ Mb. 2.44.27-32; यो भूलिङ्गन्यायेन परोपदेशमात्रकुशलः स्वयं च यथेष्टाचरणशीलः सोऽपि दाम्भिकत्वात् त्यक्तव्यः । भूलिङ्गाख्यः पक्षी मा साहसं कुर्विति पुनः पुनरुच्चैर्वदन् सिंहदंष्ट्रान्तलग्नं मांसलवं जिघृक्षतीति प्रसिद्धम् । रघुनाथ.

**भ्रष्टावसरन्यायः** The simile of a lost opportunity or proper occasion. It is used to illustrate that something does not take place when the occasion for its taking place has once gone. यदपि यजमानस्यं भ्रष्टावसरं क्रियमाणं विगुणं भवति इति तदपि गुणलोपे मुख्यस्य इत्यनेन विरुद्धम् । तंत्र. 3. 5. 46. cf. निर्वाणदीपे किमु तैलदानं चौरे गते वा किमु सावधानम् । वयोगते किं वनिताविलासः पयोगते किं खलु सेतुबन्धः । Subhāṣ.; Mar. "बैल गेला नि झोपा केला."

**मक्षिकान्यायः** The simile of a fly. It is used to illustrate the fault-finding nature of the wicked just as a fly concentrates on a wound.